# vakArAdi shrI vAmanAShTottarashatanAmastotram

# વકારાદિ શ્રીવામનાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : vakArAdi vAmanAShTottarashatanAmastotram

File name : vakArAdivAmana108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# વકારાદિ શ્રીવામનાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી હયગ્રીવાય નમઃ ।
હરિઃ ૐ

વામનો વારિજાતાક્ષો વર્ણી વાસવસોદરઃ ।
વાસુદેવો વાવદૂકો વાલખિલ્યસમો વરઃ ॥ ૧॥

વેદવાદી વિદ્યુદાભો વૃતદણ્ડો વૃષાકપિઃ ।
વારિવાહસિતચ્છત્રો વારિપૂર્ણકમણ્ડલુઃ ॥ ૨॥

વલક્ષયજ્ઞોપવીતો વરકૌપીનધારકઃ ।
વિશુદ્ધમૌઞ્જીરશનો વિધૃતસ્ફાટિકસ્રજઃ ॥ ૩॥

વૃતકૃષ્ણાજિનકુશો વિભૂતિચ્છન્નવિગ્રહઃ ।
વરભિક્ષાપાત્રકક્ષો વારિજારિમુખો વશી ॥ ૪॥

વારિજાઙ્ઘ્રિર્વૃદ્ધસેવી વદનસ્મિતચન્દ્રિકઃ ।
વલ્ગુભાષી વિશ્વચિત્તધનસ્તેયી વિશિષ્ટધીઃ ॥ ૫॥

વસન્તસદૃશો વહ્નિ શુદ્ધાઙ્ગો વિપુલપ્રભઃ ।
વિશારદો વેદમયો વિદ્વદર્ધિજનાવૃતઃ ॥ ૬॥

વિતાનપાવનો વિશ્વવિસ્મયો વિનયાન્વિતઃ ।
વન્દારુજનમન્દારો વૈષ્ણવર્ક્ષવિભૂષણઃ ॥ ૭॥

વામાક્ષીમદનો વિદ્વન્નયનામ્બુજભાસ્કરઃ ।
વારિજાસનગૌરીશવયસ્યો વાસવપ્રિયઃ ॥ ૮॥

વૈરોચનિમખાલઙ્કૃદ્વૈરોચનિવનીવકઃ ।
વૈરોચનિયશસ્સિન્ધુચન્દ્રમા વૈરિબાડબઃ ॥ ૯॥

વાસવાર્થસ્વીકૃતાર્થિભાવો વાસિતકૈતવઃ ।
વૈરોચનિકરામ્ભોજરસસિક્તપદામ્બુજઃ ॥ ૧૦॥

વૈરોચનિકરાબ્ધારાપૂરિતાઞ્જલિપઙ્કજઃ ।
વિયત્પતિતમન્દારો વિન્ધ્યાવલિકૃતોત્સવઃ ॥ ૧૧॥

વૈષમ્યનૈર્ઘૃણ્યહીનો વૈરોચનિકૃતપ્રિયઃ ।
વિદારિતૈકકાવ્યાક્ષો વાંછિતાજ્ઙ્ઘ્રિત્રયક્ષિતિઃ ॥ ૧૨॥

વૈરોચનિમહાભાગ્ય પરિણામો વિષાદહૃત્ ।
વિયદ્દુન્દુભિનિર્ઘૃષ્ટબલિવાક્યપ્રહર્ષિતઃ ॥ ૧૩॥

વૈરોચનિમહાપુણ્યાહાર્યતુલ્યવિવર્ધનઃ ।
વિબુધદ્વેષિસન્ત્રાસતુલ્યવૃદ્ધવપુર્વિભુઃ ॥ ૧૪॥

વિશ્વાત્મા વિક્રમક્રાન્તલોકો વિબુધરઞ્જનઃ ।
વસુધામણ્ડલવ્યાપિદિવ્યૈકચરણામ્બુજઃ ॥ ૧૫॥

વિધાત્રણ્ડવિનિર્ભેદિદ્વિતીયચરણામ્બુજઃ ।
વિગ્રહસ્થિતલોકૌઘો વિયદ્ગઙ્ગોદયાઙ્ઘ્રિકઃ ॥ ૧૬॥

વરાયુધધરો વન્દ્યો વિલસદ્ભૂરિભૂષણઃ ।
વિષ્વક્સેનાદ્યુપવૃતો વિશ્વમોહાબ્જનિસ્સ્વનઃ ॥ ૧૭॥

વાસ્તોષ્પત્યાદિદિક્પાલબાહુર્વિધુમયાશયઃ ।
વિરોચનાક્ષો વહ્ન્યાસ્યો વિશ્વહેત્વર્ષિગુહ્યકઃ ॥ ૧૮॥

વાર્ધિકુક્ષિર્વારિવાહકેશો વક્ષસ્થ્સલેન્દિરઃ ।
વાયુનાસો વેદકણ્ઠો વાક્છન્દા વિધિચેતનઃ ॥ ૧૯॥

વરુણસ્થાનરસનો વિગ્રહસ્થચરાચરઃ ।
વિબુધર્ષિગણપ્રાણો વિબુધારિકટિસ્થલઃ ॥ ૨૦॥

વિધિરુદ્રાદિવિનુતો વિરોચનસુતાનન્દનઃ ।
વારિતાસુરસન્દોહો વાર્ધિગમ્ભીરમાનસઃ ॥ ૨૧॥

વિરોચનપિતૃસ્તોત્રકૃતશાન્તિર્વૃષપ્રિયઃ ।
વિન્ધ્યાવલિપ્રાણનાધ ભિક્ષાદાયી વરપ્રદઃ ॥ ૨૨॥

વાસવત્રાકૃતસ્વર્ગો વૈરોચનિકૃતાતલઃ ।
વાસવશ્રીલતોપઘ્નો વૈરોચનિકૃતાદરઃ ॥ ૨૩॥

વિબુધદ્રુસુમાપાઙ્ગવારિતાશ્રિતકશ્મલઃ ।
વારિવાહોપમો વાણીભૂષણોઽવતુ વાક્પતિઃ ॥ ૨૪॥

॥ ઇતિ વકારાદિ શ્રી વામનાવતારાષ્ટોત્તરશતમ્ પરાભવ
શ્રાવણ બહુલ પ્રતિપદિ લિખિતં રામેણ સમર્પિતં ચ
શ્રી હયગ્રીવાયદેવાય ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

---

---

*vakArAdi shrI vAmanAShTottarashatanAmastotram*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*